# Pandurangashtakam

# પાણ્ડુરઙ્ગાષ્ટકમ્

## Document Information

Text title : pANDurangAShTakam

File name : pandurangа8.itx

Category : aShTaka, vishhnu, krishna, vishnu, shankarAchArya

Location : doc_vishhnu

Author : Shankaracharya

Transliterated by : NA

Proofread by : Sunder Hattangadi

Latest update : April 4, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# પાણ્ડુરઙ્ગાષ્ટકમ્

મહાયોગપીઠે તટે ભીમરથ્યા
વરં પુણ્ડરીકાય દાતું મુનીન્દ્રૈઃ ।
સમાગત્ય તિષ્ઠન્તમાનંદકંદં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૧॥

તટિદ્વાસસં નીલમેઘાવભાસં
રમામંદિરં સુંદરં ચિત્પ્રકાશમ્ ।
વરં ત્વિષ્ટકાયાં સમન્યસ્તપાદં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૨॥

પ્રમાણં ભવાબ્ધેરિદં મામકાનાં
નિતમ્બઃ કરાભ્યાં ધૃતો યેન તસ્માત્ ।
વિધાતુર્વસત્યૈ ધૃતો નાભિકોશઃ
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૩॥

સ્ફુરત્કૌસ્તુભાલઙ્કૃતં કણ્ઠદેશે
શ્રિયા જુષ્ટકેયૂરકં શ્રીનિવાસમ્ ।
શિવં શાંતમીડ્યં વરં લોકપાલં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૪॥

શરચ્ચંદ્રબિંબાનનં ચારુહાસં
લસત્કુણ્ડલાક્રાંતગણ્ડસ્થલાંતમ્ ।
જપારાગબિંબાધરં કઞ્જનેત્રં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્॥ ૫॥

કિરીટોજ્વલત્સર્વદિક્પ્રાંતભાગં
સુરૈરર્ચિતં દિવ્યરત્નૈરનર્ઘૈઃ ।
ત્રિભઙ્ગાકૃતિં બર્હમાલ્યાવતંસં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્॥ ૬॥

વિભું વેણુનાદં ચરંતં દુરંતં
સ્વયં લીલયા ગોપવેષં દધાનમ્ ।
ગવાં વૃન્દકાનન્દદં ચારુહાસં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૭॥

અજં રુક્મિણીપ્રાણસઞ્જીવનં તં
પરં ધામ કૈવલ્યમેકં તુરીયમ્ ।
પ્રસન્નં પ્રપન્નાર્તિહં દેવદેવં
પરબ્રહ્મલિઙ્ગં ભજે પાણ્ડુરઙ્ગમ્ ॥ ૮॥

સ્તવં પાણ્ડુરંગસ્ય વૈ પુણ્યદં યે
પઠન્ત્યેકચિત્તેન ભક્ત્યા ચ નિત્યમ્ ।
ભવાંભોનિધિં તે વિતીર્ત્વાન્તકાલે
હરેરાલયં શાશ્વતં પ્રાપ્નુવન્તિ ॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
પાણ્ડુરઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

*Pandurangashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*